✧˖°*❋ ❋*°˖✧

# লক্ষ্মী নৃসিংহ করাবলংব স্তোত্রম্

# Lakshmi Narsimha Karavalambam Stotram in bengali

✧˖°*❋ ❋*°˖✧

# ॥ লক্ষ্মী নৃসিংহ করাবলংব স্তোত্রম্ ॥

শ্রীমত্পযোনিধিনিকেতন চক্রপাণে ভোগীংদ্রভোগমণিরাজিত পুণ্যমূর্তে ।
যোগীশ শাশ্বত শরণ্য ভবাব্ধিপোত লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 1 ॥

ব্রহ্মেংদ্ররুদ্রমরুদর্ককিরীটকোটি সংঘট্টিতাংঘ্রিকমলামলকাংতিকাংত ।
লক্ষ্মীলসত্কুচসরোরুহরাজহংস লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 2 ॥

সংসারদাবদহনাকরভীকরোরু-জ্বালাবলীভিরতিদগ্ধতনূরুহস্য ।
ত্বত্পাদপদ্মসরসীরুহমাগতস্য লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 3 ॥

সংসারজালপতিততস্য জগন্নিবাস সর্বেংদ্রিযার্থ বডিশাগ্র ঝষোপমস্য ।
প্রোত্কংপিত প্রচুরতালুক মস্তকস্য লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 4 ॥

সংসারকূমপতিঘোরমগাধমূলং সংপ্রাপ্য দুঃখশতসর্পসমাকুলস্য ।
দীনস্য দেব কৃপযা পদমাগতস্য লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 5 ॥

সংসারভীকরকরীংদ্রকরাভিঘাত নিষ্পীড্যমানবপুষঃ সকলার্তিনাশ ।
প্রাণপ্রযাণভবভীতিসমাকুলস্য লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 6 ॥

সংসারসর্পবিষদিগ্ধমহোগ্রতীব্র দংষ্ট্রাগ্রকোটিপরিদষ্টবিনষ্টমূর্তেঃ ।
নাগারিবাহন সুধাব্ধিনিবাস শৌরে লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 7 ॥

সংসারবৃক্ষবীজমনংতকর্ম-শাখাযুতং করণপত্রমনংগপুষ্পম্ ।
আরুহ্য দুঃখফলিতঃ চকিতঃ দযালো লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 8 ॥

সংসারসাগরবিশালকরালকাল নক্রগ্রহগ্রসিতনিগ্রহবিগ্রহস্য ।
ব্যগ্রস্য রাগনিচযোর্মিনিপীডিতস্য লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 9 ॥

সংসারসাগরনিমজ্জনমুহ্যমানং দীনং বিলোকয বিভো করুণানিধে মাম্ ।
প্রহ্লাদখেদপরিহারপরাবতার লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 10 ॥

সংসারঘোরগহনে চরতো মুরারে মারোগ্রভীকরমৃগপ্রচুরার্দিতস্য ।
আর্তস্য মত্সরনিদাঘসুদুঃখিতস্য লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 11 ॥

বদ্ধ্বা গলে যমভটা বহু তর্জযংত কর্ষংতি যত্র ভবপাশশতৈর্যুতং মাম্ ।
একাকিনং পরবশং চকিতং দযালো লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 12 ॥

লক্ষ্মীপতে কমলনাভ সুরেশ বিষ্ণো যজ্ঞেশ যজ্ঞ মধুসূদন বিশ্বরূপ ।
ব্রহ্মণ্য কেশব জনার্দন বাসুদেব লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 13 ॥

একেন চক্রমপরেণ করেণ শংখ-মন্যেন সিংধুতনযামবলংব্য তিষ্ঠন্ ।
বামেতরেণ বরদাভযপদ্মচিহ্নং লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 14 ॥

অংধস্য মে হৃতবিবেকমহাধনস্য চোরৈর্মহাবলিভিরিংদ্রিযনামধেযৈঃ ।
মোহাংধকারকুহরে বিনিপাতিতস্য লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 15 ॥

প্রহ্লাদনারদপরাশরপুংডরীক-ব্যাসাদিভাগবতপুংগবহৃন্নিবাস ।
ভক্তানুরক্তপরিপালনপারিজাত লক্ষ্মীনৃসিংহ মম দেহি করাবলংবম্ ॥ 16 ॥

লক্ষ্মীনৃসিংহচরণাব্জমধুব্রতেন স্তোত্রং কৃতং শুভকরং ভুবি শংকরেণ ।
যে তত্পঠংতি মনুজা হরিভক্তিযুক্তা-স্তে যাংতি তত্পদসরোজমখংডরূপম্ ॥ 17 ॥

✧˖·····°*❋ ❋*°·····˖✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net